# प्रश्नव्याकरणोपनिषद्



एए
अणुचरिय
संजते
चरमसरीरधरे
भविस्सति

सर्वलब्धिनिधान-पञ्चमगणधर-श्रीसुधर्मस्वामिप्रणीत-

प्रश्नव्याकरणाङ्गसूत्रस्य

सारसञ्चयरूपा

# प्रश्नव्याकरणोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળ કૃતિ : **પ્રશ્નવ્યાકરણાઙ્ગસૂત્ર**

મૂળ કૃતિકાર : **સર્વલબ્ધિનિધાન પંચમગણધર શ્રીસુધર્માસ્વામિ ભગવાન**

નવનિર્મિત સારસંચય : **પ્રશ્નવ્યાકરણોપનિષદ્**

નવસર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિષય : **પાંચ આશ્રવ તથા પાંચ સંવર**

પઠન-પાઠનાધિકારી : **ગુરુ અનુજ્ઞાત શ્રમણ ભગવંતો**

વિ. સં. ~~૨૦૬૮ • વી. સં. ૨૫૩૮~~ • સને ૨૦૧૨

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## • પ્રકાશકીય •

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને... અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

લિ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા　　શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી　　શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

? प्रश्नोनो य
प्रश्न छे
संसार

ने
ઉત્તરોનો ય
ઉત્તર છે
મોક્ષ.

ઘણી કરી
પ્રશ્નોની પળોજણ
હવે
ઉત્તરમાં અવતરીએ.

- આ. કલ્યાણબોધિસૂરિ

આનંદના આકાશમાં
ઉડવાની આ વાર।
શાની પ્રતીક્ષા આતમા!
ખુલ્યું પિંજર દ્વાર॥

- અનુભૂતિગીતા

अथ

# प्रश्नव्याकरणोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम् ।
प्रणम्य नम्यं रमणीयरम्यं
चिनोमि सारं दशमाङ्गसत्कम् ॥

**आश्रवसंवरविनिश्चयं वक्ष्ये। हिंसादयः पञ्चाऽऽश्रवाः। (१) प्राणवधो** हि पापत्वादिदोषकलङ्कितो नरकहेतुश्च। तस्य प्राणवधः, शरीरा-

दुन्मूलना- इत्यादीनि ३० नामधेयानि। ये ह्यसंयताविरता पापास्त्रसस्थावरान् जीवान् चर्म-मांस-शृङ्ग-वस्त्रादिकारणशतैर्हिंसन्ति, अर्थादनर्थाद्वापि हास्यादिना क्रोधादिना अर्थधर्मकामार्थं वाऽपि घ्नन्ति, ते शौकरिकादय तद्विपाकमजानन्तो वर्धयन्ति महाभयामविश्रामवेदनां दीर्घकालबहुदुःखसङ्कटां नरकतिर्यग्योनिम्।

अशुभकर्मबहुलास्त आयुःक्षये नित्यान्धकार-बीभत्सा-ऽतिदुस्सह-त्राणादिशून्या-ऽनुबद्धनिरन्तरवेदन-यमपुरुषस-

ङ्कुलेषूपपद्यन्ते नरकेषु। वेदयन्ति च दारुणवेदनाम्, तद्यथा कन्दुमहाकुम्भ्योः पचनम्, तलनम्, भर्जनम्, कुट्टनम्, लोह-कण्टकैर्विदारणम्, अवकोटकबन्धनम्, यष्टिशतैस्ताडनम्, वृक्षशाखादावुद्-बन्धनम्, शूलाग्रभेदनम्, निन्दनादिकम्, वध्यभूमिप्रापणं च बहुपल्योपमसागरोप-मानि यावत्। कुर्वन्ति च यमकायिकत्रासिततया पूर्वभवमात्रादि-स्मरणपुरस्सरं करुणशब्दान्। कारयन्ति परमाधार्मिका बलात्तान् तप्तत्रपुःपानम्। स्मारयन्ति च पूर्वदुष्कृतान्। प्रवर्त्तते सततं

नरके महानगरदाहसदृशो निर्घोषः। किञ्च मृद्गरादिवैक्रियप्रहरणैरभिघ्नन्त उदीरयन्ति परस्परमपि ते वेदनाम्। छिन्नहस्तादिसर्वाङ्गा विलोलन्ति महीतले। स्फाट्यन्ते तद्देहा वृकादिवैक्रियपशुभिः।

ततश्च्युत्वापि बहवो गच्छन्ति तिर्यग्गतिम्। विषहन्ते च शीतोष्णवधबन्धनदहनादितीक्ष्णवेदनाम्। परिभ्राम्यन्ति च ततोऽपि चतुरिन्द्रियादिजातिकुलकोटिलक्षेष्वसङ्ख्येयं कालं यावत्, अनन्तकालं चानन्तकाये।

केचिन्मनुष्यत्वं प्राप्ता अपि प्रायः कुब्ज-वामन-बधिरा-ऽन्धभावादिकदर्थ-नाभिर्नित्यं दुःखिता भवन्ति।

एवं प्राणवधस्य विपाक उभयलोके-ऽपि दारुणो महाभयश्च, नावेदयित्वा ततो मोक्ष इत्याह श्रीवीरजिनः। तदेतदाद्य-मधर्मद्वारम्।

(२) **द्वितीयमधर्मद्वारमलीकव-चनम्।** तच्च भय-दुःखा-यशो-वैर-सङ्क्लेशकारणम्, नीचजनसेवितम्, अप्रत्ययकारकम्, परमसाधुगर्हणीयम्,

परमपीडाकारकम्, परमकृष्णलेश्यासहितम्, दुर्गतिविनिपातवर्धनम्, भवपुनर्भवकरम्, चिरपरिचितमनुगतं दुरन्तं च। तस्यालीकं शठमित्यादीनि ३० नामधेयानि।

असंयताविरताः पापाः क्रोधादिवशेन वदन्त्येतत्। नास्तिकास्तु वामलोकवादिनोऽपलपन्ति जीवादिकम्। द्वितीयमप्येतत्कुदर्शनमसद्भाववादिनः प्रज्ञापयन्ति-यथाऽण्डकादिसम्भूतो लोकः। विष्णुमयो वा। सर्वथा नित्योऽकर्ता निर्गुणश्चात्मा। यदृच्छया सर्वाऽपि जगत्स्थितिः - इत्यादि।

अपरे त्वभ्याख्यानपरा अचौरं चौरं वदन्ति। एवं तेऽलीकवचनदक्षाः परदोषोत्पादनप्रसक्ता अक्षयदुःखहेतुकर्मभिर्वेष्टयन्त्यात्मानम्। परार्थलुब्धाः कूटसाक्षित्वं कुर्वन्ति, भाषन्ते चार्थालीकादीनि।

कुर्वन्ति चाधिकरणक्रियाप्रवर्त्तनेनात्मपरानर्थम्। ज्ञापयन्ति घातकादिभ्यो महिषशूकरादीन्, तस्करादिभ्यश्च ग्रामादीन्।

भूतघातोपघातिकानि वदन्ति सत्यान्यपि हिंसकानि वचनानि। पृष्टा अपृष्टा वाऽपि ददते गोदमनादिगोचरपापोपदेशम्। तुष्टाश्चालीकमुक्त्वा भवन्ति।

तस्यालीकस्य विपाकमजानन्तो वर्द्धयन्ति महाभयां नरकतिर्यग्योनिम्। भ्राम्यन्ति दुर्गतिषु। परवशा अर्थभोगपरिवर्जिता दुर्भगत्वादिकलङ्किता अभ्याख्यानापमानादीनि दुःखानि प्राप्नुवन्ति। नैव लभन्ते सुखमिति द्वितीयाधर्मद्वारस्य विपाको वीरजिनोदितः।

(३) **तृतीयमधर्मद्वारमदत्तादानम्,** तच्च लोभमूलम्, अकीर्त्तिकरम्, अनार्यम्, तस्करजनबहुमतम्, अकरुणम्, सदा साधुगर्ह्यम्, प्रियजनमित्रजनभेदविप्रीतिका-

रकम्, रागद्वेषबहुलम्, सङ्ग्रामकलहकरम्, दुर्गतिविनिपातवर्धनम्, भवपुनर्भवकरम्, चिरपरिचितमनुगतम्, दुरन्तं च। तस्य चौरिक्यं परहृतमित्यादीनि ३० नामधेयानि।

तत्पुनस्तस्करादयो राजादयश्च कुर्वन्ति परधनलुब्धाः। भवन्ति च तदर्थं भयङ्कराः सङ्ग्रामा अपि, दारुणावारपारलङ्घनान्यपि। क्लिश्यन्ते ते स्तेनादयोऽटवीप्रभृतिषु परधनं गवेषयन्तः। कुर्वते जनकार्येषु विघ्नम्। घ्नन्ति मत्तप्रमत्तादीन्। हरणमतयो भवन्ति व्यसनाभ्युदयेषु। अतिक्रमन्ति

राजमर्यादाम्। इहलोकेऽपि क्लेशव्यसन-शतविषयीभवन्ति ते।

परद्रव्यं गवेषमाणाश्च ते राजपुरुषै-र्गृहीताः सन्तश्चारकेषु नरकसदृशवधबन्ध-नादिवेदनामाप्नुवन्ति। अस्थिभङ्ग-ताडन-तप्तशलाकाव्यथन-गलादि-परिपीडन-हृदयसञ्चूर्णन-नेत्रादिप्रहरण-निगडसङ्कोचनमोहन - पुरीषादिनिरोधप्रभृतितीव्रतमा विषहन्ते यातनाः। लकुटादिगाढप्रहारैर्भग्नसर्वगात्रा नगरचतुष्कादिषु विडम्बितास्तृष्णापीडिता न लभन्ते ते पानीयमपि।

छिद्यन्ते च तिलशः। खाद्यन्ते च स्वमांस-खण्डानि। यान्ति च शूलाग्रभेदवृक्षशा-खोद्‌बन्धन-पर्वतकटकप्रपात-गजचरणम-र्दन-कर्णौष्ठनेत्रप्रभृत्युत्पाटनादिसुदुस्सहमर-णान्तवेदनाम्।

केचिद् यावज्जीवबन्धनाः क्रियन्ते। तेऽप्यपहृतसाराः लज्जामुत्पादयन्ति स्व-जनस्य। परलोकमापन्ना गच्छन्ति दुःख-शतसमभिद्रुते नरके। पुनस्तिर्यग्गतिं गत्वा तत्रापि वेदयन्ति नरकोपमां वेदनाम्।

यद्यनन्तकालेन कथञ्चिन्मनुष्यभावं

यान्ति, तदाप्यनार्याः पशुभूताः काम-भोगतृष्णाः कोषकारकीटवदात्मानं वेष्ट-यन्त्यष्टकर्मतन्तुघनबन्धनेन। पुनरपि भ्राम्यन्ति रुद्रं संसारसागरम्। अकामेनै-वानुभवन्ति ते दुःखम्। नैव लभन्ते ते कदापि सुखम्। स एष अदत्तादानविपाकः श्रीवीरजिनोक्तः।

(४) **तुर्यमधर्मद्वारमब्रह्म**। तच्च सदेवमनुजासुरलोकप्रार्थनीयम्, पङ्कपा-शजालभूतम्, स्त्र्यादिवेदचिह्नम्, तपः-संयमब्रह्मविघ्नम्, भेदायतनबहुप्रमाद-

मूलम्, कायरकापुरुषसेवितम्, सज्जनवर्जनीयम्, जरामरणशोकबहुलम्, वधबन्धविघातदुर्विघातम्, दर्शनचारित्रमोहस्य हेतुभूतम्, चिरपरिचितमनुगतं च। तस्याब्रह्म मैथुनमित्यादीनि ३० नामधेयानि।

सुरासुरव्यन्तरादयश्चक्रिप्रभृतिराजानश्च मैथुनेऽतृप्ता एवान्ते मरणमुपयान्ति। एवं युगलिका अपि।

मैथुनसञ्ज्ञासम्प्रगृद्धाश्च मोहभृता मिथः शस्त्रघातं कुर्वते। अपरे परस्त्रीसक्ततया धनस्वजननाशं प्राप्नुवन्ति। कुर्वन्ति मित्राण्यपि

शत्रून्, धर्म-गण-समयभेदं च। द्वावपि लोकौ विराधितौ भवतः पारदारिकाणाम्। अपि च सीता-द्रौपदी-रुक्मिणी-पद्मावती-ताराप्रभृत्यर्थं ये सङ्ग्रामा बभूवुः, ते मैथुनमूला एव। एवं च लोकद्वयेऽपि नष्टा महामोहान्धकारे चातुरन्तसंसारकान्तारेऽनुपरिवर्त्तन्ते मोहवशा जीवाः।

स एष दारुणोऽब्रह्मविपाकोऽभिहितो ज्ञातकुलनन्दनेन भगवता।

**(५) पञ्चममधर्मद्वारं परिग्रहः।** नानामणिकनकरत्नपुत्रकलत्रद्विपदचतुष्पदाऽऽ-

सनभोजनादियुतसमग्रभरतक्षेत्रं भुक्त्वाऽपि याऽपरिमितेच्छा सा परिग्रहतरोर्मूलम्। लोभकलिकषाया महास्कन्धः। चिन्ताशतानि शाखाः। गौरवा अग्रविटपः। शारीरमानसखेदकलहा अग्रशिखरः। निकृतिस्त्वक्पत्रपल्लवाः। कामभोगाः पुष्पफलानि। स एष मुक्तिमार्गार्गलोपमः परिग्रहः।

तस्य परिग्रहः-सञ्चय इत्यादीनि ३० नामधेयानि।

तत्र ममत्वमतिं कुर्वन्ति भवनपत्यादिदेवाश्चक्र्यादिमानवाश्च। न तु तुष्टिं लभन्ते

तत्र, तृप्तिं वा।

अध्रुवोऽनित्योऽनन्तसङ्क्लेशकारणं परिग्रहः। धनादिसञ्चयकारिणो लोभग्रस्ता भ्राम्यन्ति सर्वदुःखनिलयं संसारम्। कुर्वन्ति परिग्रहार्थं शिल्पकलाशिक्षाऽधिगमाऽऽयासम्। वाणिज्यादिप्रचुरक्लेशं च। अपि च कुर्वते मन्दबुद्धयो हिंसा-ऽसत्य-चौर्य-स्वपरदाराभिगमसेवना-शारीराद्यायासकलहादिकमपि परिग्रहार्थम्। विषहन्तेऽपमान-तृष्णाप्रयुक्तदुःखम्। अनुभवन्ति च क्रोधादिकषायोदयकदर्थनाम्।

अपि च दण्डा गारवाः कषायाः सञ्ज्ञाः कामगुणा आश्रवा इन्द्रियलेश्याः स्वजनसम्प्रयोगाश्च परिग्रहे सति नियमाद् भवन्ति। समस्तेऽपि लोके नास्ति परिग्रहसदृशो पाशः प्रतिबन्धश्च सर्व-जीवानाम्। इतो हि लोकद्वयेऽपि नष्टा महामोहमोहितमतयो जीवा भ्राम्यन्ति संसारम्। स एष बहुदुःखः परिग्रहविपाको वीरजिनेश्वराभिहितः।

पञ्चभिरेतैराश्रवैरनुसमयं कर्म बद्ध्वा जीवा चातुरन्तसंसारदुःखमनुभवन्ति।

अकृतपुण्यास्ते भ्रमिष्यन्ति सर्वगतिषु, ये न धर्मं शृण्वन्ति, श्रुत्वाऽपि वा प्रमाद्यन्ति। बद्धनिकाचितकर्माणो मिथ्यादृशः श्रुत्वापि न कुर्वते धर्मम्। पञ्च त्यक्त्वा पञ्च च भावतो रक्षित्वा यान्ति जीवाः सिद्धिम्।

**अथ संवरपञ्चकम्**। सर्वदुःखविमोक्षणार्थमिदमुक्तं भगवता। तच्चाहिंसादिमहाव्रतरूपं मोक्षहेतुः कातरपुरुषदुस्तरं सत्पुरुषनिषेवितं च।

**(१) त्रसस्थावरसर्वभूतक्षेमकरी अहिंसा**। द्वीपस्त्राणं शरणं गतिः प्रतिष्ठा

चैषा। निर्वाणं निर्वृतिरित्यादीनि तन्नामधेयानि। एषाऽहिंसा भगवती भीतानां शरणमिव, तृषितानां सलिलमिव, क्षुधितानामशनमिव, समुद्रमध्ये पोत इव, अटवीमध्ये च विश्वस्तगमनमिव। समाचीर्णैषा तीर्थकरादिभिर्मुनिपर्यन्तैः। गवेषयन्ति ते कृतादिदोषरहितं क्रीतादिनवकोटिपरिशुद्धं दशदोषविप्रमुक्तमुद्गमोत्पादनैषणाशुद्धमुञ्छं पृथ्व्यादिसर्वभूतसंयमदयार्थम्। वर्जयन्ति ते भिक्षागवेषणायां हीलन-निन्दन-तर्जनादिकम्। अपि त्वदुष्टादीनाविमनोऽकरुणाविषादभावेन चरण-

विनयगुणयुततया च।

भगवता सर्वजीवरक्षणदयार्थं प्रवचनमिदं सुकथितम्। आत्महितमागमिष्यद्भद्रं सर्वदुःखान्तकृच्चेदम्। तदेतत्प्रथमव्रतसत्क**भावनापञ्चकं** तद्रक्षणार्थं भवति - (१) ईर्यासमितिः (२) मनोगुप्तिः (३) वचोगुप्तिः (४) एषणासमितिः (५) आदानसमितिः।

मनोवाक्कायपरिरक्षितैरेतैः पञ्चकारणैर्नित्यमामरणान्तं सर्वजिनानुज्ञातोऽनाश्रवः शुद्ध एष योगो नेतव्यो मतिमता। एवं प्रथमं

संवरद्वारं स्पृष्टं पालितं शोधितं तीर्णं कीर्त्तितमाराधितमाज्ञयाऽनुपालितं भवतीति प्रज्ञापितं श्रीवीरभगवता।

**(२) द्वितीयं संवरद्वारं सत्यवचनम्।**

तच्च शुद्धं शुचिकं शिवं सुप्रतिष्ठितयशः परमसाधुधर्मचरणं तपोनियमपरिगृहीतं सुगतिपथदेशकं च लोकोत्तमं व्रतमिदं विद्याधरगगनगमनविद्यानां साधकं स्वर्ग-मार्गसिद्धिपथदेशकं प्रत्यक्षदैवतमिवाश्चर्य-कारकं च।

न निमज्जन्ति पोता उदकसम्भ्रमेऽपि

सत्यप्रभावेन। न दह्यन्तेऽग्निसम्भ्रमेऽपि मनुष्याः सत्यप्रभावेन। एवं तप्ततैल-त्रपुर्दाहाभावः, पर्वतकटकात्पतनेऽपि मरणाभावः, असिपञ्जरोपमसङ्ग्रामादप्य-क्षतशरीराणां निर्गमः, देवतासान्निध्यं च सत्यवचोरतानां बोध्यम्।

तदेतत्तीर्थकरसुभाषितं सत्यं दश-विधम्, वन्दनीयं सुरासुरनराणाम्। येऽपि लोके मन्त्रयोगा जपा विद्या जृम्भका अर्थाः शास्त्राणि शिक्षा आगमाश्च, ते सर्वेऽपि सत्ये प्रतिष्ठितानि।

यत्तु संयमोपरोधकारकं सावद्य-त्वादिदोषदुष्टं च तत् सत्यमपि न वक्तव्यम्। त्याज्यमात्मस्तववचः परनिन्दावचश्च।

यद् द्रव्यादिभिः शिल्पागमैर्नामाख्यातनिपातोपसर्गतद्धितादिभिश्च युक्तं तत् त्रिकालविषयं दशविधसत्यं वक्तव्यम्। द्वादशविधा भाषा। षोडशविधं वचनम्। एवमर्हदनुज्ञातं समीक्षितं संयतेन काले वक्तव्यू्।

अलीकपिशुनपरुषकटुकचपलवचन-परिरक्षणार्थं भगवतेदं प्रवचनं कथितम्।

एतच्चाऽऽत्महितमागमिष्यद्भद्रमित्यादि प्राग्वत्। सत्यरक्षार्थं **भावनापञ्चकम्** - (१) आलोच्य भाषणम् (२) क्रोधपरिहारः (३) लोभ-त्यागः (४) भयवर्जनम् (५) हास्यहानम्।

मनोवाक्कायरक्षितैरेतैः पञ्चभिरित्यादि प्राग्वत्।

**(३) तृतीयं संवरद्वारं दत्तानुज्ञातसंवर इत्येवंनामकम्।** महाव्रतमिदमैहिकादिगुणकारणम्। तच्च परद्रव्यहरणप्रतिविरतिकरणयुक्तं तृष्णानिग्रहकरं

हस्तादिसंयमनिभृतं च। यत् किञ्चिद् ग्रामादौ मणिप्रभृति पतितं विस्मृतं विप्रनष्टं तत् कस्यचित् कथयितुं गृहीतं वा न कल्पते। अपरिग्रहसंवृतः सन् समलेष्टुकाञ्चनो लोके विहरेत्। यदपि पुष्पादि क्षेत्रादिगतं स्यात् तदल्पं बहु वाऽणु स्थूलं वाऽप्यदत्तं न गृहीतव्यम्, अपि तु प्रतिदिनमवग्रहमनुज्ञाप्य ग्राह्यम्।

वर्ज्यः सदाप्यप्रीतिमद्गृहप्रवेशः, तद्भक्तपानादिश्च। यस्तु परव्यपदेशग्राही परपरिवादी मत्सरी दानान्तरायकृदसं-

विभागी असङ्ग्रहरुचिस्तपःप्रभृतिस्तेनः कलहादिकरश्च, स नाराधयतीदं व्रतम्।

यस्तूपध्यादिसङ्ग्रहदानकुशलो निर्जरार्थितया बालादिवैयावृत्यमनिश्रितत्वेन कुर्वाणः, अप्रीतिमद्गृहपरिहारादिकृच्च, स आराधयतीदं व्रतम्।

एतद्दक्षार्थं **भावनापञ्चकम्** - (१) विविक्तवासवसतिसमितियोगः (२) अवग्रहसमितियोगः (३) शय्यासमितियोगः (४) साधारणपिण्डपातलाभसमितियोगः

(५) साधर्मिकविनयश्च। शेषं प्राग्वत्।

## (४) तुर्यं संवरद्वारं ब्रह्मचर्यम्।

तच्चोत्तमतपोनियमज्ञानादिमूलं यमनियम-गुणप्रधानयुक्तं मोक्षमार्गभूतम् लोकोत्तममिदं व्रतं पद्मसरस्तटाकपाल्याद्युपमम्। एतद्-भङ्गे हि सहसैव सर्वगुणसमूहभङ्गः। यथैरावतादयः कुञ्जरादिषु प्रधानाः, एवं व्रतमपीदं प्रधानं व्रतेषु। सत्यस्मिन्नेक-स्मिनहीना भवन्त्यनेके गुणाः। आराधिते चास्मिन्नाराधितं सर्वं व्रतम्, शीलतपो-विनयादि च।

स एव भिक्षुर्यो ब्रह्मचर्यं शुद्धं चरति। ब्रह्मचर्यमनुचरता पादादिप्रक्षालनसम्बाधनादिकं नृत्यगीतादिकं शृङ्गाराकारादिकानि च तपःसंयमब्रह्मचर्यघातोपघातिकानि सर्वकालं वर्ज्यानि, अस्नानमलधारणमौनव्रतकेशलोच-क्षमादमपरीषहसहनतपःप्रभृतिभिश्च भावयितव्योऽन्तरात्मा, यथा स्थिरतरं स्याद् ब्रह्मचर्यम्।

एतद्रक्षार्थं **भावनापञ्चकम्** - (१) असंसक्तवासवसतिसमितियोगः (२) स्त्रीकथाविरतिसमितियोगः (३) स्त्रीरूपविरतिसमितियोगः (४) पूर्वरतपूर्वक्रीडित-

विरतिसमितियोगः (५) प्रणीताहारविरति-समितियोगः। शेषं प्राग्वत्।

**(५) चरमं संवरद्वारमपरिग्रहः।** स च वरपादपोपमः, यतः - सम्यक्त्व-विशुद्धमूलः, धृतिकन्दः, विनयवेदिकः, विपुलयशः - पीवरस्कन्धः, पञ्चमहाव्रत-विशालशाखः, भावनात्वक्, ध्याना-दिपल्लवः, बहुगुणकुसुमसमृद्धः, शील-सुगन्धः, अनाश्रवफलः, मोक्षवरबीजसारः, मन्दरचूलिकेव च मुक्तिमार्गशिखरभूतः। यत्र ग्रामादावल्पं बहु वाऽणु स्थूलं वा

त्रसस्थावरकायद्रव्यजातं हिरण्यादि च मनसाऽपि न कल्पते गृहीतुम्। न पुष्पाद्यपि परिगृहीतुं कल्पते, योनि-समुच्छेदस्याकल्प्यत्वात्। नाप्योदनाद्यपि सन्निधिकृतं कल्पते, नाप्युद्दिष्टत्वादिदोष-दुष्टम्। तद्दोषरहितं तु प्रासुकं संयोजनादि-दोषमुक्तं तु कल्पते। अतः षट्कायरक्षणार्थं षट्स्थाननिमित्तं प्रतिदिनं प्रासुकभिक्षया वर्त्तितव्यम्।

किञ्च जीवितान्तकरे वाताद्युद्भवरोग उत्पन्नेऽपि न कल्पत औषधादि भक्तादि वा

सन्निधिकृतम्। यत्तु भाजनादि रजोहरण-चोलपट्टकादि च, तदपि संयमपुष्ट्यर्थं वातातपदंशादिरक्षणार्थं च रागद्वेषौ परिहृत्य धार्यम्, नित्यं प्रतिलेखनादियतना चाप्रमत्तं कार्या।

एवं हि स संयतः सर्वत्र समभावयुतः समुच्छिन्नसंसारः समितिगुप्तियुतः शङ्खा-दिवन्निरञ्जनत्वादिगुणयुतश्च भवति।

एतद्व्रतरक्षार्थं **भावनापञ्चकम्** - (१) - (५) मनोज्ञामनोज्ञेषु शब्दादिपञ्चसु राग-द्वेषपरिहारः। शेषं प्राग्वत्।

सदा यतनघटनसुविशुद्धदर्शनः संयत एतानि महाव्रतान्यनुचर्य चरमशरीरो भविष्यति।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखासितत्रयोदश्यां सम्पन्न इति शम्।

# *Don't Miss it.*




❧ મૂળકાર ❧

## પ.પૂ.આ. શ્રીભુવનભાનુસૂરિજી

❧ સંસ્કૃતતાત્પર્યાનુવાદકાર ❧

## આ. શ્રીકલ્યાણબોધિસૂરિજી

સુકૃત સહયોગી

## શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના